# 11. प्राणेभ्योऽपि प्रियः सुहृद्

---

## अभ्यासः

**प्रश्न 1. एकपदेन उत्तरं लिखत**

(क) कः चन्दनदासं द्रष्टुम् इच्छति?
(ख) चन्दनदासस्य वणिज्या कीदृशी आसीत्?
(ग) किम् दोषम् उत्पादयति?
(घ) चाणक्यः कं द्रष्टुम् इच्छति?
(ङ) कः शङ्कनीयः भवति?

**उत्तर:**

(क) चाणक्यः
(ख) अखण्डिता
(ग) रात्रोः प्रच्छादनम्
(घ) चन्दनदासम्
(ङ) अत्यादरः

**प्रश्न 2. अधोलिखितप्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत**

(क) चन्दनदासः कस्य गृहजनं स्वगृहे रक्षति स्म?
(ख) तृणानां केन सह विरोधः अस्ति?
(ग) पाठेऽस्मिन् चन्दनदासस्य तुलना केन सह कृता?
(घ) प्रीताभ्यः प्रकृतिभ्यः प्रतिप्रियं के इच्छन्ति?
(ङ) कस्य प्रसादेन चन्दनदासस्य वणिज्या अखण्डिता?

**उत्तर:**

(क) चन्दनदासः अमात्यराक्षसस्य गृहजनं स्वगृहे रक्षति स्म।
(ख) तृणानां अग्निना सह विरोधः अस्ति।
(ग) पाठेऽस्मिन् चन्दनदासस्य तुलना शिविना सह कृता।
(घ) प्रीताभ्यः प्रकृतिभ्यः प्रतिप्रियं राजानः इच्छन्ति।
(ङ) आर्यस्य प्रसादेन चन्दनदासस्य वणिज्या अखण्डिता।

**प्रश्न 3. स्थूलाक्षरपदानि आधृत्य प्रश्ननिर्माणं कुरुत**

(क) शिविना विना इदं दुष्करं कार्यं कः कुर्यात्।
(ख) प्राणेभ्योऽपि प्रियः सुहृत्।
(ग) आर्यस्य प्रसादेन मे वणिज्या अखण्डिता।

(घ) प्रीताभ्यः प्रकृतिभ्यः राजानः प्रतिप्रियमिच्छन्ति ।
(ङ) तृणानाम् अग्निना सह विरोधो भवति ।

**उत्तर:**
(क) केन विना इदं दुष्करं कार्य कः कुर्यात्?
(ख) प्राणेभ्योऽपि प्रियः कः?
(ग) कस्य प्रसादेन में वणिज्या अखण्डिता?
(घ) प्रीताभ्यः प्रकृतिभ्यः के प्रतिप्रियमिच्छन्ति?
(ङ) केषाम् अग्निना सह विरोधो भवति?

**प्रश्न 4. यथानिर्देशमुत्तरत**
(क) 'अखण्डिता में वणिज्या'-अस्मिन् वाक्ये क्रियापदं किम्?
(ख) पूर्वम् 'अनृतम्' इदानीम् आसीत् इति परस्परविरुद्ध वचने-अस्मात् वाक्यात् 'अधुना' इति पदस्य समानार्थकपदं चित्वा लिखत।
(ग) 'आर्य! किं मे भयं दर्शयसि' अत्र 'आर्य' इति सम्बोधनपदं कस्मै प्रयुक्तम्?
(घ) 'प्रीताभ्यः प्रकृतिभ्यः प्रतिप्रियमिच्छन्ति राजानः' अस्मिन् वाक्ये कर्तृपदं किम्?
(ङ) तस्मिन् समये आसीदस्मद्गृहे' अस्मिन् वाक्ये विशेष्यपदं किम्?

**उत्तर:**
(क) अखण्डिता
(ग) चाणक्याय
(ङ) समये
(ख) इदानीम्
(घ) राजानः

**प्रश्न 5. निर्देशानुसारं सन्धिं/सन्धिविच्छेदं कुरुत**

| | | | | | | |
|---|---|---|---|---|---|---|
| (क) यथा— | कः | + | अपि | – | कोऽपि |
| | प्राणेभ्यः | + | अपि | — | .......................... |
| | ............... | + | अस्मि | – | सज्जोऽस्मि। |
| | आत्मनः | + | ............... | – | आत्मनोऽधिकारसदृशम्। |
| (ख) यथा— | सत् | + | चित् | – | सच्चित् |
| | शरत् | + | चन्द्रः | – | .......................... |
| | कदाचित् | + | च | — | .......................... |

**उत्तरः**

| | | | | | |
|---|---|---|---|---|---|
| (क) | प्राणेभ्यः | + | अपि | – | **प्राणेभ्योऽपि।** |
| | **सज्जः** | + | अस्मि | – | सज्जोऽस्मि। |
| | आत्मनः | + | **अधिकारसदृशम्** | – | आत्मनोऽधिकारसदृशम्। |
| (ख) | शरत् | + | चन्द्रः | – | **शरच्चन्द्रः।** |
| | कदाचित् | + | च | – | **कदाचिच्च।** |

**प्रश्न 6. कोष्ठकेषु दत्तयोः पदयोः शुद्धं विकल्पं विचित्य रिक्तस्थानानि पूरयत**
(क) .................. विना इदं दुष्करं कः कुर्यात् । (चन्दनदासस्य/चन्दनदासेन)
(ख) .................. इदं वृत्तान्तं निवेदयामि। (गुरवे/गुरोः)
(ग) आर्यस्य .................. अखण्डिता मे वणिज्या। (प्रसादात्/प्रसादेन)
(घ) अलम् ..................। (कलहेन/कलहात्)
(ङ) वीरः ............ बालं रक्षति। (सिंहेन/सिंहात्)
(च) ............ भीतः मम भ्राता सोपानात् अपतत्। (कुक्कुरेण/कुक्कुरात्)
(छ) छात्रः ................ प्रश्नं पृच्छति। (आचार्यम्/आचार्येण)

**उत्तरः**
(क) चन्दनदासेन विना इदं दुष्कार कः कुर्यात्?
(ख) गुरवे इदं वृत्तान्तं निवेदयामि।
(ग) आर्यस्य प्रसादेन अखण्डिता मे वणिज्या।
(घ) अलम् कलहेन।
(ङ) वीरः सिंहात् बालं रक्षति।
(च) कुक्कुरात् भीतः मम भ्राता सोपानात् अपतत्।
(छ) छात्रः आचार्यम् प्रश्नं पृच्छति।

**प्रश्न 7. अधोदत्तमञ्जूषातः समुचितपदानि गृहीत्वा विलोमपदानि लिखत**
असत्यम् , पश्चात् , गुणः ,आदरः ,तदानीम् ,तत्र
(क) अनादरः — .......................
(ख) दोषः — .......................
(ग) पूर्वम् — .......................
(घ) सत्यम् — .......................
(ङ) इदानीम् — .......................
(च) अत्र — .......................

**उत्तरः**
(क) अनादरः — आदरः
(ख) दोषः — गुणः
(ग) पूर्वम् — पश्चात्
(घ) सत्यम् — असत्यम्
(ङ) इदानीम् — तदानीम्
(च) अत्र — तत्र

**प्रश्न 8. उदाहरणमनुसृत्य अधोलिखितानि पदानि प्रयुज्य पञ्चवाक्यानि रचयत**
यथा-निष्क्रम्य-शिक्षिका पुस्तकालयात् निष्क्रम्य कक्षा प्रविशति।
(क) उपसृत्य — ......................
(ख) प्रविश्य — ......................
(ग) द्रष्टुम् — ......................
(घ) इदानीम् — ......................
(ङ) अत्र — ......................

**उत्तरः**
(क) उपसृत्य – शिष्याः गुरुकुलं उपसृत्य वेदान् अपठन्।
(ख) प्रविश्य – सभागारं प्रविश्य छात्राः तूष्णीं तिष्ठन्ति।
(ग) द्रष्टुम् – वयम् ह्यः चलचित्रम् द्रष्टुम् अगच्छाम।
(घ) इदानीम् – इदानीम् भक्ताः ईश्वरं पूजयन्ति।
(ङ) अत्र – अत्र आगत्य कोलाहलः न करणीयः।

## योग्यताविस्तारः

### कविपरिचयः
'मुद्राराक्षसम्' इति नाटकस्य प्रणेता विशाखदत्तः आसीत्। सः राजवंशे उत्पन्नः आसीत्। तस्य पिता भास्करदत्तः महाराजस्य पदवीं प्राप्नोत्। विशाखदत्तः राजनीतेः न्यायस्य ज्योतिषविषयस्य च विद्वान् आसीत्। वैदिकधर्मावलम्बी भूत्वाऽपि सः बौद्धध र्मस्य अपि आदरमकरोत्।

### ग्रन्थपरिचयः
'मुद्राराक्षसम्' एकम् ऐतिहासिक नाटकम् अस्ति। दशाङ्केषु विरचिते अस्मिन्नाटके चाणक्यस्य राजनीतिककौशलस्य बुद्धिवैभवस्य राष्ट्रसञ्चालनार्थम् कूटनीतीनाम् निदर्शनमस्ति। _अस्मिन्नाटके चाणक्यस्यामात्यराक्षसस्य च कूटनीत्योः संघर्षः।

**भावविस्तारः**

चाणक्य-चाणक्यः एकः विद्वान् ब्राह्मणः आसीत्। तस्य पितृप्रदत्तं नाम विष्णुगुप्तः आसीत्। अयमेव 'कौटिल्य' इति नाम्ना प्रसिद्धः। केषाञ्चित् विदुषाम् इदमपि मतमस्ति यत् राजनीतिशास्त्रे कुटिलनीतेः प्रतिष्ठापनाय तस्याः स्व-जीवने उपयोगाय च अयं 'कौटिल्यः' इत्यपि कथ्यते। चणकनामकस्य कस्यचित् आचार्यस्य पुत्रत्वात् 'चाणक्यः' इति नाम्ना स प्रसिद्धः जातः। नन्दानां राज्यकालः शतवर्षाणि पर्यन्तम् आसीत्। तेषु अन्तिमेषु द्वादशवर्षेषु एतेन सुमाल्यादीनाम् अष्टनन्दानां संहारः कारितः तथा च चन्द्रगुप्तमौर्यः नृपत्वेन राजसिंहासने स्थापितः। अयमेक: महान् राजनीतिज्ञः आसीत्। एतेन भारतीयशासनव्यवस्थायाः प्रामाणिकतत्त्वानां वर्णनेन युक्तं "अर्थशास्त्रम्" इति अतिमहत्त्वपूर्णः ग्रन्थः रचितः।

चन्द्रगुप्तमौर्यः- चन्द्रगुप्तः महापद्मनन्दस्य मुरायाः च पुत्रः आसीत्। चाणक्यस्य मार्गदर्शने अनेन चतुर्विंशतिवर्षपर्यन्तं राज्यं कृतम्।
राक्षसः-नन्दराज्ञः स्वामिभक्तः चतुरः प्रधानामात्यः आसीत्।
चन्दनदासः-कुसुमपुर नाम्नि नगरे महामात्यस्य राक्षसस्य प्रियतम पात्रं मित्रञ्च आसीत्। स मणिकारः श्रेष्ठी च आसीत्। अस्यैव गृहात् राक्षसः सपरिवारः नगरात् बहिरगच्छत्।

**भाषिकविस्तारः**

1. पृथक् और विना शब्दों के योग में द्वितीया तृतीया और पंचमी तीनों विभक्तियों का प्रयोग-
यथा – जलं विना जीवनं न सम्भवति। – द्वितीया
जलेन विना जीवनं न सम्भवति। – तृतीया
जलात् विना जीवनं न सम्भवति। – पंचमी
परिश्रमं पृथक् नास्ति सुखम्। – द्वितीया
परिश्रमेण पृथक् नास्ति सुखम्। – तृतीया
परिश्रमात् पृथक् नास्ति सुखम्। – पंचमी

**2. अनीयर् प्रत्ययप्रयोगः**
अत्यादरः शङ्कनीयः
जन्तुशाला दर्शनीया
याचकेभ्यः दानं दानीयम्
वेदमन्त्राः स्मरणीयाः

पुस्तकमेलापके पुस्तकानि क्रयणीयानि।
(क) अनीयर् प्रत्ययस्य प्रयोगः योग्यार्थे भवति।
(ख) अनीयर् प्रत्यये 'अनीय' इति अवशिष्यते।
(ग) अस्य रूपाणि त्रिषु लिगेषु चलन्ति।

यथा-
पुंल्लिने – स्त्रीलिङ्गे – नपुंसकलिङ्गे
पठनीयः – पठनीया – पठनीयम्
इनके रूप क्रमशः देववत्, लतावत् तथा फलवत् चलेगें।

**3. उभ सर्वनामपदम्**
पुंल्लिङ्गे – स्त्रीलिङ्गे – नपुंसकलिड़े
उभे – उभे – उभे
उभौ – उभे – उभे
उभाभ्याम् – उभाभ्याम् – उभाभ्याम्
उभाभ्याम् – उभाभ्याम् – उभाभ्याम्
उभाभ्याम् – उभाभ्याम् – उभाभ्याम्
उभयोः – उभयोः – उभयोः
उभयोः – उभयोः – उभयोः